# संस्कृत वार्ता:

दिनाङ्क : 04/07/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थाने एक-दशांशोत्तर-शून्य-पञ्च- लक्ष-कोटि-रूप्यतोऽप्यधिकानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च विहितवान् ।
- केन्द्रीय-गृह-मन्त्रालयेन विधि – विरुद्ध – क्रियाकलाप - निवारण-अधिनियमान्तर्गतं पाकिस्ताने स्थिताः त्रयोविंशति-जनाः आतङ्कवादित्वेन उद्घोषिताः।
- व्यापकरूपेण प्रवृत्तं चलच्चित्र-वंचनावृत्तमाधृत्य भारतसर्वकारेण 'टेलीग्राम' संस्थायाः कृते आधिकारिकी सूचना प्रसारिता।
- भारत-इस्राएलदेशयोः मध्ये सञ्जातः द्विपक्षीय-निवेश-संधिः अद्यारभ्य आधिकारिकरूपेण प्रवृत्तो जातः।
- भारतर्तु-विज्ञान-विभागेन विज्ञापितं यत् आगामिषु चतुर्दिवसेषु मध्यभागे गुजरात-राज्यस्य कतिपयेषु अन्यभागेषु, हरियाणा-पंजाब-राजस्थानप्रान्तानां शिष्टेषु क्षेत्रेषु प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते ।
- पुरुष-क्रिकेट-क्रीडायां भारत-इङ्गलैण्डदेशयोः मध्ये द्वितीया टी-20 अन्ताराष्ट्रियक्रीडा अद्य मंचेस्टर-नगरे क्रीडिष्यते ।

--------------------------------------------

प्रधानमन्त्री-राजस्थानम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजस्थाने एक-दशांशोत्तर-शून्य-पञ्च- लक्ष-कोटि-रूप्यतोऽप्यधिकानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च विहितवान् । अनेन राज्ये आधारभूत-संरचनायां, ऊर्जायां, परिवहने उद्यम-सृजने च तीव्रता आयास्यति । स्वस्य यात्रायां प्रधानमन्त्रिणा जोधपुर-विमानपत्तने नूतनस्य टर्मिनल-भवनस्य उद्घाटनं कृतम् ।

तदनन्तरं सः बालोतरा-मण्डलस्य पचपदरा-क्षेत्रे देशस्य अत्याधुनिकं ग्रीनफील्ड-रिफाइनरी-सह-पेट्रोकेमिकल-कॉम्प्लेक्स इत्येतत् राष्ट्राय समर्पितवान्। अत्रान्तरे तेन जयपुर-मेट्रो-द्वितीय-

चरणस्य शिलान्यासः अपि आभासी-माध्यमेन कृतः । अस्मिन् अवसरे जनसभां सम्बोधयन् प्रधानमन्त्रिणा प्रोक्तं यत्, पश्चिम-एशिया-क्षेत्रस्य सङ्घर्षेण एकविंशतितमायाः शताब्द्याः महत्तमः ऊर्जा-सङ्कटः समुत्पन्नः, किन्तु भारतेन समयोचित-निर्णयैः कूटनीत्या च एषः कालः सम्मुखीकृतः। पूर्वं भारतं पञ्चविंशतिः षड्विंशति-देशेभ्यः ऊर्जा-आयातं करोति स्म, इदानीं तत् चत्वारिंशत्-देशेषु विस्तारितम् । सः सबलं प्रावोचत् यत् वैश्विकोत्पाते अपि सर्वकारेण वातेन्धनस्य मूल्यं द्विसहस्ररूप्यकाणां स्थाने केवलं पञ्चाशदधिक-नवशतं रूप्यकेषु नियन्त्रितम् ।

प्रधानमन्त्रिणा प्रोक्तं यत्, पश्चिम-एशिया-यूक्रेन-सङ्घर्षैः समुत्पन्ने वैश्विक-उर्वरक-सङ्कटे अपि यूरिया-मूल्यं त्रिसहस्ररूप्यकाणां स्थाने कृषकाणां कृते त्रिशतं रूप्यकेषु एव सुरक्षितम्। अनेनैव सह जोधपुरतः आरब्धया उड़ान-योजनया लघु-नगराणां सुदूर-क्षेत्राणाञ्च कृते वैमानिक-सम्पर्कः अधिकः सुदृढः भविष्यति।

राजस्थान-सर्वकारस्य विभिन्न-विभागेषु च नियुक्तानां चतुःपञ्चाशत्- सहस्र-युवकानां कृते नियुक्ति-पत्राणि वितरितानि।

---

**<u>गृहमन्त्रालय-आतङ्कवादिनः</u>**

केन्द्रीय-गृह-मन्त्रालयेन विधि – विरुद्ध – क्रियाकलाप - निवारण-अधिनियमान्तर्गतं पाकिस्ताने स्थिताः त्रयोविंशति-जनाः आतङ्कवादित्वेन उद्घोषिताः। एते सर्वे जैश-ए-मोहम्मद, लश्कर-ए-तैयबा इत्यादिभिः आतङ्कवादी-सङ्गठनैः सह सम्बद्धाः आसन् । मन्त्रालयेन निगदितं यत् देशस्य नागरिकाणां सुरक्षायै सर्वकारः प्रत्येकं आतङ्कवादी-सञ्जालं विनष्टुं कृतसङ्कल्पः अस्ति। अद्य उद्घोषितेषु त्रयोविंशति-आतङ्कवादिषु सप्तदश-पाकिस्तानदेशस्य नागरिकाः, षट् च भारतीय-नागरिकाः सन्ति परञ्च साम्प्रतं इमे पाकिस्तानात्, पाकिस्तान-अधिकृत-जम्मू-काश्मीराच्च आतङ्कवादी-गतिविधीन् सञ्चालयन्ति। एते आतङ्कवादिनः भारत-विरोधी-कृत्येषु, शस्त्रास्त्र-तस्करेषु निधि-सङ्ग्रहादिषु संलग्नाः सन्ति। अस्याः घोषणायाः परं राष्ट्रियान्वेषण-अभिकरणेन एतेषां वित्तीय-स्रोतांसि अवरोद्धुं शक्यन्ते, सम्पत्तिश्च स्वायत्तीकर्तुं शक्यते ।

अवधेयमिदं यत् , एकोनविंशत्यधिक-द्विसहस्रतमे वर्षे यूएपीए-अधिनियमे संशोधनस्य कार्यान्वयनानन्तरं केन्द्रीय-सर्वकारेण अशीति-जनाः आतङ्कवादित्वेन उद्घोषिताः।

---------------------------------------------

<u>सरकार-टेलीग्राम</u>

व्यापकरूपेण प्रवृत्तं चलच्चित्र-वंचनावृत्तमाधृत्य भारतसर्वकारेण 'टेलीग्राम' संस्थायाः कृते आधिकारिकी सूचना प्रसारिता। आधकारिक-स्रोतेभ्यः प्राप्तानुसारं, प्रशासनेन टेलीग्राम-संस्था वंचना-प्रसारितेभ्यः चलच्चित्रेभ्यः ओटीटी विषयवस्तुभ्यः सद्यः प्रतिबन्धात्मकं पदक्षेपं वोढुं समादिष्टा। अस्य संवाद-मञ्चस्य प्रबन्धकाः आगामिषु पञ्चदशदिनेषु स्वीकृत कार्याचरणस्य प्रतिवेदनं प्रेषितुं निर्दिष्टाः।

---------------------------------------------

<u>भारत-इस्राएल बीआईए</u>

भारत-इस्राएलदेशयोः मध्ये सञ्जातः द्विपक्षीय-निवेश-संधिः अद्यारभ्य अर्थात् जुलाई मासस्य पंच दिनांकात् आधिकारिकरूपेण प्रवृत्तो जातः। अयं हि ऐतिहासिकः सन्धिः गतवर्षे सितम्बरमासे नवदेहल्यां हस्ताक्षरितं गतः।

केन्द्रीय-वित्तमन्त्रालयः प्रत्यपादयत् यत् अयं द्विपक्षीय-निवेश-संधिः उभयोः राष्ट्रयोः आर्थिक-सम्बन्धानां सुदृढीकरणाय अथ एकं सुरक्षितं, पूर्वानुमानयोग्यं निवेश-वातावरणं निर्मातुमेकं ऐतिहासिकं चरणं वर्तते। मन्त्रालयेन गदितं यत् संधेः आधारेण परिसीम्नि निवेश-गतिविधिषु प्रवर्धनेन सह भारत-इस्राएलदेशयोः मध्ये रणनीतिक-आर्थिक-सहभागिता अपि गभीरा भविता।

---------------------------------------------

<u>उपराष्ट्रपति-प्रधानमंत्री-विवेकानन्द</u>

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् प्रधानमन्त्री नरेन्द्रमोदी च अद्य स्वामी विवेकानन्दस्य पुण्यतिथौ तस्मै सादरं श्रद्धाञ्जलिं समर्पितवन्तौ। सामाजिकान्तर्जालीय सन्देशे उपराष्ट्रपतिना राधाकृष्णन् इत्यनेन स्वामी विवेकानन्दः कश्चन महान् देशभक्तः, दार्शनिकः, आध्यात्मिक-द्रष्टा

चेति व्यपदिष्टः। तेन प्रोदीरितं यत् स्वामी विवेकानन्देन भारतस्य सभ्यतामूलक-चेतनायाः पुनर्जागरणं विहितं सहैव देशस्य सनातनज्ञानं कृत्स्नं हि विश्वं प्रति प्रसारितम्। उपराष्ट्रपतिना सबलं विज्ञापितं यत् स्वामिनः आत्मविश्वासपूर्णस्य, प्रबुद्धस्य, करुणापूर्णस्य च भारतस्य परिकल्पना अद्यापि राष्ट्रस्य विकासयात्रायाः मार्गं दिशति। सः आशां प्रकटितवान् यत् स्वामिविवेकानन्दस्य आदर्शाः सर्वेषां कृते निष्ठापूर्वकं सेवायै, उत्कृष्ट-चारित्र्य-निर्माणाय, राष्ट्र-निर्माणे दृढ-सङ्कल्पबद्धतायै अविरतं प्रेरयिष्यन्ति।

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितं यत् भारतस्य संस्कृतिं, आध्यात्मिकताम्, राष्ट्रिय-चेतनां च वैश्विकपटले प्रतिष्ठापयितुं स्वामी विवेकानन्दस्य यत् अवदानं वर्तते, तत् अनुपमम् अस्ति। श्रीमोदी अब्रवीत् यत् स्वामिनः प्रखरा बुद्धिः सत्प्रेरकाः विचाराश्च अद्यापि कोटिशः यूनां कृते पथप्रदर्शकाः सन्ति। तेन अग्रे गदितं यत् स्वामिविवेकानन्दस्य आध्यात्मिकोपदेशाः 'विकसित-भारतस्य' सङ्कल्पसिद्धये राष्ट्राय एकां विनूत्नाम् ऊर्जां दिशं च प्रदास्यन्ति ।

---------------------------------------------

<u>प्रधानमन्त्री-ई-जागृति</u>

प्रधानमन्त्री नरेन्द्र-मोदी अद्य डिजिटल-परिष्कारैः उपभोक्तृ-न्यायं सुदृढीकर्तुं सर्वकारस्य प्रयत्नान् रेखाङ्कितवान्। केन्द्रीयमन्त्रिणा प्रल्हाद-जोशिनः लेखं प्रकाशयन् श्रीमोदी अवदत् यत्, सम्बद्ध-पक्षैः सह व्यापक-मन्त्रणायाः परं ई-जागृति-मञ्चः परिष्कृतः येन उपभोक्ता-न्याय-क्षेत्रं संरचनात्मक-डिजिटल-परिवर्तनस्य कश्चन प्रमुखाधारत्वेन सिद्धो जातः। मन्त्रिणा श्रीजोशिना स्वलेखे प्रोक्तं यत्, ई-जागृति इति उपभोक्तृ-परिदेवना समग्रं जीवन-चक्रं साङ्ख्यिकीकरणं कृत्वा भारतस्य उपभोक्तृ-न्याय-प्रणालीं आधुनिकं विधातुं कश्चन उत्तमोपक्रमः अस्ति। तेन सबलं प्रोदीरितं यत्, अयं मञ्चः डिजिटल-प्रविधेः, कृत्रिम-बुद्धिमत्तायाः तथा च मिश्रित-श्रवणप्रणाल्याः उपयोगं कृत्वा न्याय-व्यवस्थां तीव्रां, पारदर्शिनीं, सौकर्ययुतां च करोति येन पूर्वतन-अवरोधाः दूरीभवन्ति।

---------------------------------------------

## ऋतु-विज्ञान-विभागेन

भारतर्तु-विज्ञान-विभागेन विज्ञापितं यत् आगामिषु चतुर्दिवसेषु मध्यभागे गुजरात-राज्यस्य कतिपयेषु अन्यभागेषु, हरियाणा-पंजाब-राजस्थानप्रान्तानां शिष्टेषु क्षेत्रेषु प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते । विभागेनानेन श्वः यावत् मध्यप्रदेश, तटीय-कर्नाटक, पूर्व-राजस्थान, तेलंगाना विदर्भक्षेत्रेषु अतिवृष्टेः पूर्वसूचना प्रदत्ता।

---------------------------------------------

## क्रिकेट टी-20

पुरुष-क्रिकेट-क्रीडायां भारत-इङ्गलैण्डदेशयोः मध्ये द्वितीया टी-20 अन्ताराष्ट्रियक्रीडा अद्य मंचेस्टर-नगरे क्रीडिष्यते। भारतीय-समयानुसारं क्रीडेयं अद्य सायं सप्तवादने आरप्स्यते।

।। इति वार्ता: ।।